**Time : 2½ Hours** **SANSKRIT (T.L.)**

**Subject Code**

| S | 1 | 3 | 5 |
|---|---|---|---|

**Total No. of Questions : 8** **(Printed Pages : 11)** **Maximum Marks : 80**

***सूचना :***

(*i*) सर्वेषां प्रश्नानाम् उत्तराणि नवीने पत्रे लेखनीयानि।

(*ii*) प्रश्नानां क्रमाङ्का: तथा उपप्रश्नानाम् अक्षराणि स्पष्टतया लेखनीयानि।

(*iii*) सम्पूर्णे उत्तरपत्रे एकस्या: एव स्वभाषाया: उपयोग: करणीय:।

(*iv*) स्वभाषा नाम हिंदी, मराठी, कोङ्कणी, आङ्ग्लभाषा वा।

(*v*) **सर्वे** प्रश्ना: अनिवार्या: सन्ति।

(*vi*) दक्षिणे भागे दर्शिताङ्का: गुणाङ्का: सन्ति।

**प्रथमखण्ड: (पठितावबोधनम्) — (32 गुणाङ्का:)**

1. (क) अधस्तनं गद्यखण्डं पठित्वा प्रदत्तान् प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत। 5

गोमन्तकप्रदेश: वृक्षराजिभि: सम्पन्नै: पर्वतप्रदेशै: नारिकेलवृक्षाणां कुलागरै: समुद्रतटै: च शोभते। नदीसरोवरादिकानि तु अस्य प्रदेशस्य वैशिष्ट्यं वर्तते। गोमन्तकस्य दक्षिणभागे मठग्राम-केपे मार्गे मठग्रामत: 10-12 किमी. दूरे सह्याद्रे: शाखान्तरभाग: चन्द्रनाथनाम्ना प्रसिद्ध: लघुपर्वत: विद्यते। अस्य पर्वतशिखरं चन्द्रेश्वरमन्दिरेण विराजते। पर्वतस्य मूलभागे 'मुळस' इति स्थानं प्रसिद्धम्। पर्वतशिखरं गन्तुं द्वौ मार्गौ स्त:। एक: सोपानमार्ग: अन्य: यानमार्गश्च।

**प्रश्ना :**

(अ) दशपदैः प्रश्नौ उत्तरत।

(1) गोमन्तकप्रदेशः कैः शोभते ? 2

(2) पर्वतशिखरं गन्तुं द्वौ मार्गौ कौ स्तः ? 2

(आ) सन्धिविग्रहं लिखत – यानमार्गश्च। 1

(ख) अधस्तनं पद्यखण्डं पठित्वा प्रश्नान् सूचनानुसारेण संस्कृतभाषया उत्तरत। 3

विद्या विवादाय धनं मदाय
शक्तिः परेषां परिपीडनाय।
खलस्य साधोर्विपरीतमेतद्
ज्ञानाय दानाय च रक्षणाय॥
कुसुमं वर्णसम्पन्नं गन्धहीनं न शोभते।
न शोभते क्रियाहीनं मधुरं वचनं तथा॥

**प्रश्ना :**

(अ) दशपदैः प्रश्नम् उत्तरत।

सज्जनानां विद्या, धनं, शक्तिः च किमर्थं भवति ? 2

(आ) पद्यखण्डात् 'पुष्पम्' इत्यस्य पर्यायपदं लिखत। 1

(ग) अधस्तनवाक्यानि कः कं प्रति अवदत् तत् लिखत। **(द्वयोः)** 2

(अ) "गोमन्तकस्य लोकजीवनम् समृद्धं निसर्गानुरूपं च विद्यते।"

(आ) "प्रतिवेशिनः श्रेष्ठिनः गृहे मासानन्तरम् एकः यज्ञः सम्पत्स्यते।"

(इ) "नो चेत् अहमपि अग्निप्रवेशं करिष्यामि।"

2. (घ) **एकस्य** गद्यखण्डस्य स्वभाषया अनुवादं लिखत। 4

(अ) प्रारम्भे मम प्रवाहे मधुरं जलं विद्यते। तज्जलं जनानां कृते पेयं स्नानयोग्यं चास्ति। मम जलेन कृषीवलाः क्षेत्राणि सिञ्चन्ति। येन जीवानां कृते बहुधान्यस्य फलपुष्प-मूलानाञ्च प्राप्तिः भवति। तेन सर्वत्र सुभिक्षं भवति। किन्तु यदाहं सागरान्तिकं प्राप्नोमि, तदा शनैः शनैः मम जलं क्षारं भवति। मम क्षारं जलमपि जनानाम् उपयुक्तमेव, यतः तस्मात् जनाः लवणं लभन्ते।

(आ) तेजिन्दरः – शुचे! ध्वजस्य मध्ये स्थितस्य चक्रस्य किमपि महत्वम् अस्ति किम् ?

शुचिः – अथ किम्! इदम् अशोक चक्रं सत्यस्य धर्मस्य अहिंसायाश्च द्योतकम्।

प्रणवः – किं न जानासि स्वतंत्रतायाः आन्दोलने अस्य ध्वजस्य महती भूमिका आसीत्।

शुचिः – का सा ध्वजस्य भूमिका ?

(ङ) **एकस्य** सुभाषितस्य अनुवादं स्वभाषया लिखत। 2

(अ) व्यसने मित्रपरीक्षा, शूरपरीक्षा रणाङ्गणे भवति।
विनये भृत्यपरीक्षा, दानपरीक्षा च दुर्भिक्षे॥

(आ) बालो वा यदि वा वृद्धो युवा वा गृहमागतः।
तस्य पूजा विधातव्या सर्वस्याभ्यागतो गुरुः॥

(च) **द्वयोः** प्रश्नयोः उत्तरे स्वभाषया लिखत। 4

(अ) पाठाधारेण श्रीमान् भाऊसाहेब महोदयस्य कार्यविषये लिखत।

(आ) 'गोमन्तके कृषिव्यवस्था निसर्गानुरूपं विद्यते' इति स्पष्टीकुरुत।

(इ) अर्जुनेन कृष्णसहाय्येन कथं प्रतिज्ञासागरः तीर्णः ?

3. (छ) प्रश्नानाम् उत्तराणि **एक**वाक्येन संस्कृतभाषया लिखत। (**चतुर्णाम्**) 4

(अ) जयद्रथः कैः आच्छादितः ?

(आ) 'माण्ड' व्यवस्था कस्य उत्तमः अविष्कारः अस्ति ?

(इ) माधवः सर्वदा किं चिन्तयति स्म ?

(ई) खनिजवहनं कैः क्रियते ?

(उ) चन्द्रेश्वरस्य दक्षिणे कोणे किम् अस्ति ?

(ज) सुभाषितानि पूर्णतया लिखत। 6

(अ) नरनारी .................. ।.................. ॥

(आ) न सदा.................. ।.................. ॥

(इ) कृपणेन .................. ।.................. ॥

(झ) वाक्यांशयोः मेलनं कृत्वा लिखत। 2

| अ | आ |
|---|---|
| (1) देवचारवृक्षपूजनम् | (अ) छात्रेषु स्निह्यति। |
| (2) श्रीमान् भाऊसाहेब बांदोडकरः | (आ) जलसम्बद्धा व्यवस्था। |
| | (इ) वृक्षसंरक्षणस्य महत्वम्। |

## द्वितीयखण्डः (अपठितावबोधनम्) — (12 अङ्काः)

4. (ट) अधः दत्तं गद्यखण्डं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि सूचनानुसारेण संस्कृतभाषया लिखत। 6

आंग्लजनाः भारतीयेषु अत्याचारं कुर्वन्ति स्म। अस्माकं राष्ट्रनायकानां प्रयत्नैः 1747 तमे वर्षे अगस्तमासस्य पञ्चदश दिनाङ्के अस्माकं भारतदेशः स्वतन्त्रः सञ्जातः, अतः अयं दिवसः स्वर्णाक्षरैः अङ्कितः। अगस्तमासस्य पञ्चदशदिनाङ्के प्रतिवर्षम् इदं पर्वं हर्षोल्लासेन जनाः मन्यन्ते। प्रति ग्रामं, प्रति नगरं, प्रति विद्यालयं, प्रति राजकीय-कार्यालयं इत्यत्र स्वातंत्रोत्सवोऽयं सोत्साहेन मन्यन्ते। ध्वजारोहण-सांस्कृतिक-कार्यक्रमे बालकाः बालिकाः च देशभक्तिमयानि गीतानि गीत्वा वीरान् स्मरन्ति। सर्वत्र रमणीयं दृश्यं भवति।

**प्रश्ना :**

(अ) दशपदैः प्रश्नौ उत्तरत।

(1) अगस्तमासस्य पञ्चदशदिनाङ्कः किमर्थं स्वर्णाक्षरैः अङ्कितः ? 2

(2) अयम् स्वातंत्रोत्सवः कुत्र-कुत्र मन्यन्ते ? 2

(आ) गद्यखण्डात् 'पाठशाला' इति पदस्य पर्यायपदं लिखत। 1

(इ) सर्वत्र रमणीयं दृश्यं भवति। (वाक्यं लृट्लकारे (भविष्य काले) लिखत) 1

(ठ) अधः दत्तं पद्यखण्डं पठित्वा प्रदत्तानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत। 3

बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम्।

पश्य सिंहो मदोन्मत्त शृगालेन निपातितः॥

सर्पः क्रूरः, खलः क्रूरः, सर्पात् क्रूरतरः खलः।

मन्त्रौषधिवशः सर्पः, खलः केनोपशाम्यति॥

**प्रश्ना :**

(अ) एकवाक्येन उत्तरत।

(1) मदोन्मत्तः सिंहः केन निपातितः ? 1

(2) मन्त्रौषधिवशः कः अस्ति ? 1

(3) खलः कस्मात् क्रूरतरः अस्ति ? 1

(ड) अधोलिखितयोः परिच्छेदयोः **एकस्य** अनुवादं स्वभाषया लिखत। 3

(अ) पूर्वं श्रीहर्षः भारतस्य चक्रवर्ती आसीत्। तस्मिन् काले 'ह्यूयन्त्साङ्गः' नाम चीनदेशीयः यात्री भारतम् आगतवान्। सः भारते अनेकेषु स्थलेषु अटितवान्। जनानां व्यवहारं ज्ञातवान्। भारतीयसंस्कृतिम् अवगतवान्। विविधान् धर्मग्रन्थान्, विविधानि ऐतिहासिकवस्तूनि च सङ्गृहीतवान्। सः स्वदेशगमनात् पूर्वं हर्षचक्रवर्तिनं दृष्टवान्।

(आ) श्यामला – सुधीर! भवान् क्रीडोत्सवविषये जानाति वा ?

सुधीरः – आम्। डिसेंबरमासे विद्यालयस्य क्रीडोत्सवः अस्ति।

श्यामला – एवं वा। भवान् कस्यां क्रीडायां भागं गृह्णाति ?

सुधीरः – अहं धावनक्रीडायाम् अस्मि।

श्यामला – अहम् अपि धावनक्रीडायाम् अस्मि। 'कबड्डी' क्रीडाम् अपि क्रीडामि। त्वं न क्रीडसि वा 'कबड्डी' क्रीडा ?

सुधीरः – मह्यम् 'कबड्डी' क्रीडा न रोचते।

## तृतीयखण्डः (व्याकरणम्) — (20 गुणाङ्काः)

5. (ढ) रिक्तस्थानेषु उचितानि पदरूपाणि कोष्ठकात् चित्वा वाक्यानि पुनः लिखत। (**चतुर्णाम्**) 4

(अ) .............................. ध्वजे त्रयः वर्णाः सन्ति।

(अस्मिन्, अस्य, अस्मात्)

(आ) तस्य विविधासु .............................. अपि रूचिरवर्तत।

(कलासु, कलायाः, कलां)

(इ) धीवराः .............................. श्रावणपौर्णिमायां नारिकेलम् अर्पयन्ति।

(समुद्रस्य, समुद्रेन, समुद्राय)

(ई) माता .............................. सह गच्छति।

(पुत्रात्, पुत्रेण, पुत्रस्य)

(उ) .............................. जलं पतति।

(चषकं, चषकस्य, चषकात्)

(ण) सूचनानुसारं वाक्यपरिवर्तनं कृत्वा लिखत। (**द्वयोः**) 2

(अ) अहं ५.३० वादने उत्तिष्ठामि।

(समयवाचिपदं लिखत।)

(आ) त्वं गीतं गायसि।

(बहुवचने परिवर्तयत)

(इ) तेन कार्यः करणीयम्।

(वाक्यं संशोध्य लिखत)

(ई) लेखकः कथाम् अलिखत्।

('स्म' अव्ययं योजयत)

(त) रेखाङ्कितपदम् आधृत्य प्रश्ननिर्माणं कुरुत। (**द्वयोः**) 2

(अ) <u>भाऊसाहेबः</u> दानवीरः आसीत्।

(आ) <u>देहेन</u> मासचतुष्टयस्य भोजनं भवेत्।

(इ) जुवारी <u>माण्डव्याः</u> प्रिय सखी अस्ति।

(थ) 'क्त्वान्त' प्रत्ययान्तानि अव्ययानि लिखत। 2

(अ) क्री

(आ) लिख्

6. (द) सन्धिं कुरुत। (**त्रयाणाम्**) 3

(अ) अपि + आसीत्

(आ) एतावत् + मात्रम्

(इ) नमः + तुभ्यम्

(ई) च + अस्ति

(ध) तालिकायां रिक्तस्थानेषु समस्तपदम्/विग्रहवाक्यं/समासनाम वा लिखत। (**त्रयाणाम्**)। 3

| **समस्तपदम्** | **विग्रहः** | **समासनाम** |
|---|---|---|
| (अ) स्वार्थपराः | ........................ | सप्तमी तत्पुरुषः |
| (आ) ........................ | अहः च निशा च | द्वन्द्व समासः |
| (इ) प्रतिवर्षम् | ........................ | अव्ययीभावः |
| (ई) पात्रहस्तः | पात्रं हस्ते यस्य सः | ........................ |

(न) पर्यायपदानि लिखत। 2

(अ) अयनम्

(आ) बाणः

(प) विलोमपदानि मेलयित्वा लिखत। 2

| | |
|---|---|
| (1) गुणः | (1) अविचार्य |
| (2) विचार्य | (2) गृहम् |
| | (3) दोषः |
| | (4) सुविचार्य |

## चतुर्थखण्डः (रचना) — (16 गुणाङ्काः)

7. (फ) तालिकायाः उचितपदानि चित्वा पञ्च सार्थकवाक्यानि लिखत। 5

| | | |
|---|---|---|
| (अ) शिक्षकाः | कथां | पिबति। |
| (आ) यूयम् | ग्रामं | स्तः। |
| (इ) रुग्णः | बालकौ | पाठयन्ति। |
| (ई) तौ | पाठं | गच्छाव। |
| (उ) आवां | औषधं | कथयथ। |

(ब) मञ्जूषायां दत्तपदानां साहाय्येन संवादपूर्तिं कृत्वा लिखत। 3

(अस्माकं, कुर्मः, दूरभाषां, गच्छामि, चिन्तनम्, सायङ्काले)

मिलिन्दः – आगामि मासस्य कार्यक्रमस्य विषये ...................... एव न कृतम्।

नारायणः – मित्र! कार्यक्रमस्य चिन्तनविषये चिन्ता मास्तु। वयं सर्वे मिलित्वा कार्याणि ...................... चेत् कोऽपि क्लेशः न भवति।

मिलिन्दः – यदि तद् विषये ...................... चर्चा भवेत् तर्हि कार्याणां विभाजनं भवति।

नारायणः – अस्तु इदानीम् अहं कार्यालयं ......................। शक्यं चेत् चर्चां कर्तुं ...................... मम गृहम् आगच्छतु।

मिलिन्दः – आम्। आगमनात् पूर्वं ...................... करोमि।

8. (भ) अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत। 4

(1) वृद्धशृगालः कर्पूरतिलकं अभिषेकार्थम् आहूतवान्।

(2) शृगालेन उक्तम् – 'मद्विधस्य वचसि त्वया विश्वासः कृतः, तस्य फलम् एतत्' इति।

(3) हस्तीना उक्तं – 'महापङ्के पतितोऽहं म्रिये'।

(4) महापङ्कात् बहिः गन्तुम् असमर्थः हस्ती पञ्चत्वं गतः।

(5) ब्रह्मारण्ये कर्पूरतिलको नाम हस्ती आसीत्।

(6) राज्यलोभाकृष्टः कर्पूरतिलकः शृगालदर्शितवर्त्मना अधावन् महापङ्के निमग्नः।

(7) एकेन वृद्धशृगालेन प्रतिज्ञा कृता।

(8) तमवलोक्य शृगालाः स्वेच्छाभोजनविषये चिन्तयन्ति।

(म) कमपि **एकं** विषयम् अधिकृत्य संस्कृतभाषया **अष्ट**वाक्यानि लिखत। 4

(अ) नारिकेलवृक्षः।

(आ) कविकुलगुरुः कालिदासः।

(इ) संस्कृतभाषा।

**अथवा**

(म) चित्रम् आधृत्य कोष्ठकस्थ-पदानां साहाय्येन संस्कृतभाषया **अष्ट**वाक्यानि लिखत। 4

(वालुकागृहम्, कन्दुकेन, तरन्ति, पर्वतः, जले, सूर्यास्तः, वाताटाः, क्रीणाति, उत्साहेन, अटन्ति, नौकया, उपविशतः)

